**कीटमणि** पु० कीटेषु मणिरिव । खद्योते शब्दचि० ।

**कीटमातृ** स्त्री कीटस्य मातेव मूले बहुलकीटप्रसवात् । हंसपदीवृक्षे भावप्र० ।

**कीटमारी** स्त्री कीटान् मारयति सेवनेन मृ–णिच्–अण् उप०स०गौरा०ङीष् मुग्ध०मते षण् ईप् । हंसपदीवृक्षे राजनि०। [(उच्चिड़िङ्गा) इतिख्याते कीटभेदे शब्दचि०।

**कीटमेष** पु० कोटोमेष इव । नदीतीरे सिकतामध्ये स्थायिनि

**कीटसंज्ञ** पु० कीटः संज्ञा यस्य । "कर्कटवृश्चिकमीना मकरान्त्यार्द्धञ्च कीटसंज्ञाः स्युः" ज्यो० उक्तेषु कर्कटादिषु राशिषु कीटाख्यादयोऽप्यत्र । यद्यप्येषां सर्वेषां कीटसंज्ञा तथापि क्वचित् कीटशब्दस्य वृश्चिकराशिमात्रपरता यथा "हरिः कीटघटेन च" पताकीवेधे वृश्चिकस्यैव सिंहकुम्भाभ्यां वेधात्तस्यैव ग्रहणम् ।

**कीडेर** पु० कील–एरच् लस्य डः । तण्डुलीयशाके–भावप्र०।

**कीदृक्ष** त्रि०कस्येव दर्शनमस्य किम्+दृश–क्स क्यादेशे दीर्घः । किम्प्रकारे । क्विन् । कीदृश् । कञ् । कीदृश तत्रार्थे त्रि० तत्र कञि स्त्रियां ङीप्, क्से टाप् इति भेदः । "प्रिये ! स कीदृक् भविता तव क्षणः" नैष० । "यद्येतानि जयन्ति हन्त परितः शस्त्राण्यमोघानि मे तद्वोः कीदृगसौ विवेकविभवः कीदृक् प्रबोधोदयः" प्रवोधच० ।

**कीनाश** पु० कुत्सितं नाशयति, कीचनाशि अच् क्लिश्नाति नि०वा । १यमे "विधेहि कीनाशनिकेतनातिथिम्" माघः । २वानरे पुंस्त्री अमरः स्त्रियां जातित्वात् ङीष् । ३पशुघ्ने ४क्षुद्रे ५कर्षके च त्रि० मेदि० । "कीनाशो गोवृषो यानमलङ्कारश्च वेश्म च । विप्रस्यौद्धारिकं देयमेकांशस्य प्रधानतः" मनुः "कीनाशः कर्षकः" कुल्लू० । "शुनं न फाला विकृषन्तु भूमिं शुनं कीनाशा अभियन्तु वाहैः" ऋ०४,५७,८, "कीनाशाः बलीवर्द्दरक्षकाः" भा० । "नाद्रियन्ते यथापूर्वं कीनाशाइव गोजरम्" भाग०३, ३०,११ । क्षुद्रे "य उद्यतमनादृत्य कीनाशमभियाचते । क्षीयते तद्यशः स्फीतं मानश्चावज्ञया हतः" भाग०२२,१२

**कीर** पुंस्त्री कोति ईरयति ईर–णिच्–अच् । १शुके पक्षिभेदे अमरः । "खगवागियमित्यतोऽपि किं न मुदं धास्यति ? कीरगीरिव" नैष० जातित्वात् स्त्रियां ङीष् । २काश्मीरदेशे पु० भूम्नि मेदि० अल्पार्थे कन् । कीरक शुकशावे संज्ञायां कन् । वृक्षभेदे क्षपणके च धरणिः

**कीरवर्णक** न० कीरस्येव वर्णोऽस्य कप् । (स्यौणेयक) नाम सुगन्धिद्रव्ये राजनि० ।

**कीरि** पु० कीर्य्यते विक्षिप्यते कॄ–बा०कि । १स्तोत्रे "कीरिणा देवान्नमसोपशिक्षन्" ऋ०५,४०,८, "कीरिणा स्तोत्रेण" भा० २स्तुत्यादिषु विक्षिप्ते त्रि० । "यस्या हृदा कीरिणा मन्यमानः" ऋ०५,४,१०, "कीरिणा स्तुत्यादिषु विक्षिप्तेन हृदा" भा० ३स्तोतरि त्रि० निरु० "वसु स्तुवते कीरये" ऋ० ६,२३,३, "कीरिरितिस्तोतृनाम" भा० "सखाय कीरिचोदनम्" ऋ० ६,४५,१९, "कीरीणां स्तोतॄणां चोदनं प्रेरयितारम्" भा० ।

**कीरेष्ट** पु० कीरस्य इष्टः । १आम्रवृक्षे २आखोटवृक्षे (आखरोट) ३जलमधूकवृक्षे च राजनि० ।

**कीर्ण** त्रि० कॄ–क्त । १आच्छन्ने २निहिते ३विक्षिप्ते ४हिंसिते च मेदि० । "अमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा" शकु० । "कीर्णं शनैरनुकपोलमनेकपानाम्" माघः ।

**कीर्णि** स्त्री० कॄ–भावे क्तिन् नि० निभावः । १विक्षेपे २हिंसने ३आच्छादने च । [ कथने ।

**कीर्त्तन** न० चु०कृत–कीर्त्तादेशः सौत्र–कीर्त्त–वा भावे ल्युट् ।

**कीर्त्तना** स्त्री चु० कृत कीर्त्तादेशे भावे युच् । १कथने । कर्म्मणि युच् । २यशसि शब्दरत्ना० ।

**कीर्त्ति** स्त्री सौ०कीर्त्त –क्तिन् । १प्रसादे मेदि०२शब्दे ३दीप्तौ ४मातृकाविशेषे च शब्दरत्ना०५विस्तरे ६कर्द्दमे च विश्वः । ७ख्यातिभेदे अमरः । ख्यातिभेदस्य धार्म्मिकत्वादि प्रशस्तधर्म्मवत्त्वेन नानादेशीय कथन ज्ञानविषय ता । कीर्त्तिश्च जीवतोमृतस्य वेत्यत्र विशेषोनास्ति । "यस्य कीर्त्तिः स्रुता लोके धन्यं तस्य सुजीवितम्" नीतिसारे "सम्भावितस्य चाकीर्त्तिर्मरणादतिरिच्यते" गीतायाञ्च जीवतोऽपि कीर्त्तिसत्त्वस्योक्तेः। तत्र दानादिप्रभावा ख्यातिः कीर्त्तिः शौर्य्यादिप्रभवा ख्यातिर्यश इति केचिद्यशःकीर्त्त्योर्भेदमाहुः "कीर्त्तिं स्वर्गफलामाहुरासंसारं नृणां किल" इत्यनेन कीर्त्तेः स्वर्गफलतोक्तेः । जीवतःख्यातिर्यशः मृतस्य ख्यातिः कीर्त्तिरिति विभागस्तु न सम्यक् "इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम्" इति मनुना इहलोकेऽपि कीर्त्तिप्राप्तेरुक्तेः । एतेन "प्रज्ञां यशश्च कीर्त्तिञ्च ब्रह्मवर्चसमेव च" मनुवाक्यस्य "जीवन् यशः मृतस्य कीर्त्तिमिति" कुल्लू०व्याख्या चिन्त्या प्रागदर्शितमनुवाक्यान्तरविरोधात् किन्तु स्वर्गादिफलकदानादिधर्म्मेणैव कीर्त्तिः, शौर्य्यादिना यश इत्यभयोर्भेदसम्भवेन मनुवाक्यस्य तदर्थपरत्वमेवोचितम् "स्वकान्तिकीर्त्तिव्रजमौक्तिकस्रजम्" नैष० ।